# श्री जिनस्तुतिः ॥

सं. मुनि जगच्चन्द्रविजयगणि

॥ श्री जिनेभ्यो नमः ॥

कु ख गों घ ङ च छों जा ।

झों ञ ट' ठो' ड ढा ण ते ।(तैः)

थ्यु द धि' नि प फो' बा भू' ।

माँ या र लो' व' शं ष स ॥१॥ इति जिनस्तुति ॥

अस्य श्लोकस्य व्याख्या

हे अज त्वं मामवरक्ष इत्यर्थः ।

अज इति किं ? जायते इति जः न जः अजः ।

न विद्यते ज-जन्म यस्य स वीतरागस्तस्य संबोधनं हे अजः ।

त्वं कथंभूतः कु पृथ्वी तस्यां खगः सूर्यः इति कुखगः ।

पुनः कथंभूतस्त्वं अघं पापं तस्य ङ विषय तस्य च समूहः-

तस्य छ छेदकः इत्यर्थः इति अघङचछः ।

पुनः कथंभूतस्त्वं ? न विद्यते झो बंधनमस्य असौ अझः ।

बंधनं किं ? कर्मणाम् ।

पुनः अ इति निषिद्धे

ञ विषय एव ट वातो यस्यासौ अञट तस्य संबोधने हे अञटः ।

पुन कथंभूतस्त्वं अणमज्ञानता क्रोधो तैः ठ शून्यो रहित इत्यर्थः ।

पुन कथंभूतस्त्वं - ड चन्द्रमंडलः तद्वत् ढो विख्यातः ।

पुन कथंभूतस्त्वं - थयोः लक्षणानि समुद्रिकादयः तेषामुदधिः इति थ्युदधिः।

पुन कथंभूतस्त्वं - नि भद्रं तदेव पं प्रौढं फं फलं यस्यासौ निपफः ।

पुन कथंभूतः-ब क्लेशः तस्य न विद्यते भू उत्पत्ति र्यस्यासौ बाभूः ।

पुन कथंभूतः-या पृथ्वी तस्या रान् भयान् लः लुनाति इति यारलः ।

हे अञटः(ट!)-पुनस्त्वं कथंभूतः शं सुखं तदेव षा श्रेष्ठा सा लक्ष्मीर्यस्यासौ शंषसः इदृशस्त्वं इति शब्दार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अर्थ

हे अजन्मा ! वीतराग ! तुं मारी रक्षा कर...

हे प्रभु ! आ पृथ्वी उपर तुं सूर्यसम छे.

पापनां विषयसमूहोने छेदनार ! कर्मबंधनथी मुक्त !

हे विषय(वासना)रूप वायुने रोकनारा प्रभु !!!

तुं अज्ञानता कषाय आदिथी रहित छे.

चन्द्रनी जेम प्रख्यात

सामुद्रिक आदि लक्षणोनो समुद्र = सारा उत्तम लक्षणवाळो

कल्याणरूप प्रौढ - प्रतापी फलने मेळवनार

संक्लेशथी रहित

पृथ्वीनां महाभयोने दूर करनार

(मोक्षरूप) श्रेष्ठ सुख लक्ष्मीने प्राप्त करनार

हे प्रभु ! तने नमन... वंदन... हो...

**नोंध :** एक पुराणा फुटकर ह.लि. पानां सचवायेली आ लघुरचना अज्ञातकर्तृक होवा छतां साहित्यिक रीते चमत्कृतिपूर्ण लागवाथी यथामति संपादित करी अत्रे प्रस्तुत करी छे. बाराखडीना अक्षरो पासेथी केवुं मजानुं अर्थघटन हांसल करी शकाय छे तेनो तथा कर्तानी प्रतिभानो आमां आपणने परिचय थाय छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org